# Raghuvansha 19 by Kalidas

# રઘુવંશં સર્ગઃ ૧૯ અગ્નિવર્ણશૃઙ્ગાર કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha19 agnivarNashRiNgaara

File name : raghuvansha19.itx

Category : major_works, svara, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : December 20, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૯ અગ્નિવર્ણશૃઙ્ગાર કાલિદાસકૃતમ્

અગ્નિવર્ણમભિષિચ્ય રાઘવઃ સ્વે પદે તનયમગ્નિતેજસમ્ ।
શિશ્રિયે શ્રુતવતામપશ્ચિમઃ પશ્ચિમે વયસિ નૈમિષં વશી ॥ ૧૯-૧॥

તત્ર તીર્થસલિલેન દીર્ઘિકાસ્તલ્પમન્તરિતભૂમિભિઃ કુશૈઃ ।
સૌધવાસમુટજેન વિસ્મૃતઃ સંચિકાય ફલનિઃસ્પૃહસ્તપઃ ॥ ૧૯-૨॥

લબ્ધપાલનવિધૌ ન તત્સુતઃ ખેદમાપ ગુરુણા હિ મેદિની ।
ભોક્તુમેવ ભુજનિર્જિતદ્વિષા ન પ્રસાધયિતુમસ્ય કલ્પિતા ॥ ૧૯-૩॥

સોઽધિકારમભિકઃ કુલોચિતં કાશ્ચન સ્વયમવર્તયત્સમાઃ ।
સંનિવેશ્ય સચિવેષ્વતઃપરં સ્ત્રીવિધેયનવયૌવનોઽભવત્ ॥ ૧૯-૪॥

કામિનીસહચરસ્ય કામિનસ્તસ્ય વેશ્મસુ મૃદઙ્ગનાદિષુ ।
ઋદ્ધિમન્તમધિકર્દ્ધિરુત્તરઃ પૂર્વમુત્સવમપોહદુત્સવઃ ॥ ૧૯-૫॥

ઇન્દ્રિયાર્થપરિશૂન્યમક્ષમઃ સોઢુમેકમપિ સ ક્ષણાન્તરમ્ ।
અન્તરેવ વિહરન્દિવાનિશં ન વ્યપૈક્ષત સમુત્સુકાઃ પ્રજાઃ ॥ ૧૯-૬॥

ગૌરવાદ્યદપિ જાતુ મન્ત્રિણાં દર્શનં પ્રકૃતિકાઙ્ક્ષિતં દદૌ ।
તદ્ગવાક્ષવિવરાવલમ્બિના કેવલેન ચરણેન કલ્પિતમ્ ॥ ૧૯-૭॥

તં કૃતપ્રણતયોઽનુજીવિનઃ કોમલાત્મનખરાગરૂષિતમ્ ।
ભેજિરે નવદિવાકરાતપસ્પૃષ્ટપઙ્કજતુલાધિરોહણમ્ ॥ ૧૯-૮॥

યૌવનોન્નતવિલાસિનીસ્તનક્ષોભલોલકમલાશ્ચ દીર્ઘિકાઃ ।
ગૂઢમોહનગૃહાસ્તદમ્બુભિઃ સ વ્યગાહત વિગાઢમન્મથઃ ॥ ૧૯-૯॥

તત્ર સેકહૃતલોચનાઞ્જનૈર્ધૌતરાગપરિપાટલાધરૈઃ ।
અઙ્ગનાસ્તમધિકં વ્યલોભયન્નર્પિતપ્રકૃતકાન્તિભિર્મુખૈઃ ॥ ૧૯-૧૦॥

ઘ્રાણકાન્તમધુગન્ધકર્ષિણીઃ પાનભૂમિરચનાઃ પ્રિયાસખઃ ।
અભ્યપદ્યત સ વાસિતાસખઃ પુષ્પિતાઃ કમલિનીરિવ દ્વિપઃ ॥ ૧૯-૧૧॥

સાતિરેકમદકારણં રહસ્તેન દત્તમભિલેષુરઙ્ગનાઃ ।
તાભિરપ્યુપહૃતં મુખાસવં સોઽપિબદ્બકુલતુલ્યદોહદઃ ॥ ૧૯-૧૨॥

અઙ્કમઙ્કપરિવર્તનોચિતે તસ્ય નિન્યતુરશૂન્યતામુભે ।
વલ્લકી ચ હૃદયંગમક્ષમા વલ્ગુવાગપિ ચ વામલોચના ॥ ૧૯-૧૩॥

સ સ્વયં પ્રહતપુષ્કરઃ કૃતી લોલમાલ્યવલયો હરન્મનઃ ।
નર્તકીરભિનયાતિલઙ્ઘિનીઃ પાર્શ્વવર્તિષુ ગુરુષ્વલજ્જયત્ ॥ ૧૯-૧૪॥

ચારુ નૃત્યવિગમે સ તન્મુખં સ્વેદભિન્નતિલકં પરિશ્રમાત્ ।
પ્રેમદત્તવદનાનિલઃ પિબન્નત્યજીવદમરાલકેશ્વરૌ ॥ ૧૯-૧૫॥

તસ્ય સાવરણદૃષ્ટસંધયઃ કામ્યવસ્તુષુ નવેષુ સઙ્ગિનઃ ।
વલ્લભાભિરુપસૃત્ય ચક્રિરે સામિભુક્તવિષયાઃ સમાગમા ॥ ૧૯-૧૬॥

અઙ્ગુલીકિસલયાગ્રતર્જનં ભ્રૂવિભઙ્ગકુટિલં ચ વીક્ષિતમ્ ।
મેખલાભિરસકૃચ્ચ બન્ધનં વઞ્ચયન્પ્રણયિનીરવાપ સઃ ॥ ૧૯-૧૭॥

તેન દૂતિવિદિતં નિષેદુષા પૃષ્ઠતઃ સુરતવારરાત્રિષુ ।
શુશ્રુવે પ્રિયજનસ્ય કાતરં વિપ્રલમ્ભપરિશઙ્કિનો વચઃ ॥ ૧૯-૧૮॥

લૌલ્યમેત્ય ગૃહિણીપરિગ્રહાન્નર્તકીષ્વસુલભાસુ તદ્વપુઃ ।
વર્તતે સ્મ સ કથંચિદાલિખન્નઙ્ગુલીક્ષરણસન્નવર્તિકઃ ॥ ૧૯-૧૯॥

પ્રેમગર્વિતવિપક્ષમત્સરાદાયતાશ્ચ મદનાન્મહીક્ષિતમ્ ।
નિન્યુરુત્સવવિધિચ્છલેન તં દેવ્ય ઉજ્ઝિતરુષઃ કૃતાર્થતામ્ ॥ ૧૯-૨૦॥

પ્રાતરેત્ય પરિભોગશોભિના દર્શનેન કૃતખણ્ડનવ્યથાઃ ।
પ્રાઞ્જલિઃ પ્રણયિનીઃ પ્રસાદયન્સોઽદુનોત્પ્રણયમન્થરઃ પુનઃ ॥ ૧૯-૨૧॥

સ્વપ્નકીર્તિતવિપક્ષમઙ્ગનાઃ પ્રત્યભૈત્સુરવદન્ત્ય એવ તમ્ ।
પ્રચ્છદાન્તગલિતાશ્રુબિન્દુભિઃ ક્રોધભિન્નવલયૈર્વિવર્તનૈઃ ॥ ૧૯-૨૨॥

કૢપ્તપુષ્પશયનાँલ્લતાગૃહાનેત્ય દૂતિકૃતમાર્ગદર્શનઃ ।
અન્વભૂત્પરિજનાઙ્ગનારતં સોઽવરોધભયવેપથૂત્તરમ્ ॥ ૧૯-૨૩॥

નામ વલ્લભજનસ્ય તે મયા પ્રાપ્ય ભાગ્યમપિ તસ્ય કાઙ્ક્ષ્યતે ।
લોલુપં નનુ મનો મમેતિ તં ગોત્રવિસ્ખલિતમૂચુરઙ્ગનાઃ ॥ ૧૯-૨૪॥

ચૂર્ણબભ્રુ લુલિતસ્રગાકુલં છિન્નમેખલમલક્તકાઙ્કિતમ્ ।
ઉત્થિતસ્ય શયનં વિલાસિનસ્તસ્ય વિભ્રમરતાન્યપાવૃણોત્ ॥ ૧૯-૨૫॥

સ સ્વયં ચરણરાગમાદધે યોષિતાં ન ચ તથા સમાહિતઃ ।
લોભ્યમાનનયનઃ શ્લથાંશુકૈર્મેખલાગુણપદૈર્નિતમ્બિભિઃ ॥ ૧૯-૨૬॥

ચુમ્બને વિપરિવર્તિતાધરં હસ્તરોધિ રશનાવિઘટ્ટને ।
વિઘ્નિતેચ્છમપિ તસ્ય સર્વતો મન્મથેન્ધનમભૂદ્વધૂરતમ્ ॥ ૧૯-૨૭॥

દર્પણેષુ પરિભોગદર્શિનીર્નર્મપૂર્વમનુપૃષ્ઠસંસ્થિતઃ ।
છાયયા સ્મિતમનોજ્ઞયા વધૂર્હ્રીનિમીલિતમુખીશ્ચકાર સઃ ॥ ૧૯-૨૮॥

કણ્ઠસક્તમૃદુબાહુબન્ધનં ન્યસ્તપાદતલમગ્રપાદયોઃ ।
પ્રાર્થયન્ત શયનોત્થિતં પ્રિયાસ્તં નિશાત્યયવિસર્ગચુમ્બનમ્ ॥ ૧૯-૨૯॥

પ્રેક્ષ્ય દર્પણતલસ્થમાત્મનો રાજવેષમતિશક્રશોભિનમ્ ।
પિપ્રિયે ન સ તથા યથા યુવા વ્યક્તલક્ષ્મપરિભોગમણ્ડનમ્ ॥ ૧૯-૩૦॥

મિત્રકૃત્યમપદિશ્ય પાર્શ્વતઃ પ્રસ્થિતં તમનવસ્થિતં પ્રિયાઃ ।
વિદ્મ હે શઠ પલાયનચ્છલાન્યઞ્જસેતિ રુરુધુઃ કચગ્રહૈઃ ॥ ૧૯-૩૧॥

તસ્ય નિર્દયરતિશ્રમાલસાઃ કણ્ઠસૂત્રમપદિશ્ય યોષિતઃ ।
અધ્યશેરત બૃહદ્ભુજાન્તરં પીવરસ્તનવિલુપ્તચન્દનમ્ ॥ ૧૯-૩૨॥

સંગમાય નિશિ ગૂઢચારિણં ચારદૂતિકથિતં પુરોગતાઃ ।
વઞ્ચયિષ્યસિ કુતસ્તમોવૃતઃ કામુકેતિ ચકૃષુસ્તમઙ્ગનાઃ ॥ ૧૯-૩૩॥

યોષિતામુડુપતેરિવાર્ચિષાં સ્પર્શનિવૃતિમસાવવાપ્નુવન્ ।
આરુરોહ કુમુદાકરોપમાં રાત્રિજાગરપરો દિવાશયઃ ॥ ૧૯-૩૪॥

વેણુના દશનપીડિતાધરા વીણયા નખપદાઙ્કિતોરવઃ ।
શિલ્પકાર્ય ઉભયેન વેજિતાસ્તં વિજિહ્મનયના વ્યલોભયન્ ॥ ૧૯-૩૫॥

અઙ્ગસત્ત્વવચનાશ્રયં મિથઃ સ્ત્રીષુ નૃત્યમુપધાય દર્શયન્ ।
સ પ્રયોગનિપુણૈઃ પ્રયોક્તૃભિઃ સંજઘર્ષ સહ મિત્રસંનિધૌ ॥ ૧૯-૩૬॥

અંસલમ્બિકુટજાર્જુનસ્રજસ્તસ્ય નીપરજસાઙ્ગરાગિણઃ ।
પ્રાવૃષિ પ્રમદબર્હિણેષ્વભૂત્કૃત્રિમાદ્રિષુ વિહારવિભ્રમઃ ॥ ૧૯-૩૭॥

વિગ્રહાચ્ચ શયને પરાઙ્મુખીર્નાનુનેતુમબલાઃ સ તત્ત્વરે ।
આચકાઙ્ક્ષ ઘનશબ્દવિક્લવાસ્તા વિવૃત્ય વિશતીર્ભુજાન્તરમ્ ॥ ૧૯-૩૮॥

કાર્તિકીષુ સવિતાનહર્મ્યભાગ્યામિનીષુ લલિતાઙ્ગનાસખઃ ।

અન્વભુઙ્ક્ત સુરતશ્રમાપહાં મેઘમુક્તવિશદાં સ ચન્દ્રિકામ્ ॥ ૧૯-૩૯॥

સૈકતં સ સરયૂં વિવૃણ્વતીં શ્રોણિબિમ્બમિવ હંસમેખલમ્ ।
સ્વપ્રિયાવિલસિતાનુકારિણીં સૌધજાલવિવરૈર્વ્યલોકયત્ ॥ ૧૯-૪૦॥

મર્મરૈરગુરુધૂપગન્ધિભિર્વ્યક્તહેમરશનૈસ્તમેકતઃ ।
જહ્રુરાગ્રથનમોક્ષલોલુપં હૈમનૈર્નિવસનૈઃ સુમધ્યમાઃ ॥ ૧૯-૪૧॥

અર્પિતસ્તિમિતદીપદૃષ્ટયો ગર્ભવેશ્મસુ નિવાતકુક્ષિષુ ।
તસ્ય સર્વસુરતાન્તરક્ષમાઃ સાક્ષિતાં શિશિરરાત્રયો યયુઃ ॥ ૧૯-૪૨॥

દક્ષિણેન પવનેન સંભૃતં પ્રેક્ષ્ય ચૂતકુસુમં સપલ્લવમ્ ।
અન્વનૈષુરવધૂતવિગ્રહાસ્તં દુરુત્સહવિયોગમઙ્ગનાઃ ॥ ૧૯-૪૩॥

તાઃ સ્વમઙ્કમધિરોપ્ય દોલયા પ્રેઙ્ખયન્પરિજનાપવિદ્ધયા ।
મુક્તરજ્જુ નિબિડં ભયચ્છલાત્કણ્ઠબન્ધનમવાપ બાહુભિઃ ॥ ૧૯-૪૪॥

તં પયોધરનિષિક્તચન્દનૈર્મૌક્તિકગ્રથિતચારુભૂષણૈઃ ।
ગ્રીષ્મવેષવિધિભિઃ સિષેવિરે શ્રોણિલમ્બિમણિમેખલૈઃ પ્રિયાઃ ॥ ૧૯-૪૫॥

યત્સ લગ્નસહકારમાસવં રક્તપાટલસમાગમં પપૌ ।
તેન તસ્ય મધુનિર્ગમાત્કૃશશ્ચિત્તયોનિરભવત્પુનર્નવઃ ॥ ૧૯-૪૬॥

એવમિન્દ્રિયસુખાનિ નિર્વિશન્નન્યકાર્યવિમુખઃ સ પાર્થિવઃ ।
આત્મલક્ષણનિવેદિતાનૃતૂનત્યવાહયદનઙ્ગવાહિતઃ ॥ ૧૯-૪૭॥

તં પ્રમત્તમપિ ન પ્રભાવતઃ શેકુરાક્રમિતુમન્યપાર્થિવાઃ ।
આમયસ્તુ રતિરાગસંભવો દક્ષશાપ ઇવ ચન્દ્રમક્ષિણોત્ ॥ ૧૯-૪૮॥

દૃષ્ટદોષમપિ તન્ન સોઽત્યજત્સઙ્ગવસ્તુ ભિષજામનાશ્રવઃ ।
સ્વાદુભિસ્તુ વિષયૈર્હૃતસ્તતો દુઃખમિન્દ્રિયગણો નિવાર્યતે ॥ ૧૯-૪૯॥

તસ્ય પાણ્ડુવદનાલ્પભૂષણા સાવલમ્બગમના મૃદુસ્વના ।
રાજયક્ષ્મપરિહાનિરાયયૌ કામયાનસમવસ્થયા તુલામ્ ॥ ૧૯-૫૦॥

વ્યોમ પશ્ચિમકલાસ્થિતેન્દુ વા પઙ્કશેષમિવ ઘર્મપલ્વલમ્ ।
રાજ્ઞિ તત્કુલમભૂત્ક્ષયાતુરે વામનાર્ચિરિવ દીપભાજનમ્ ॥ ૧૯-૫૧॥

બાઢમેષ દિવસેષુ પાર્થિવઃ કર્મ સાધયતિ પુત્રજન્મને ।
ઇત્યદર્શિતરુજોઽસ્ય મન્ત્રિણઃ શશ્વદૂચુરઘશઙ્કિનીઃ પ્રજાઃ ॥ ૧૯-૫૨॥

સ ત્વનેકવનિતાસખોઽપિ સન્પાવનીમનવલોક્ય સંતતિમ્ ।
વૈદ્યયત્નપરિભાવિનં ગદં ન પ્રદીપ ઇવ વાયુમત્યગાત્ ॥ ૧૯-૫૩॥

તં ગૃહોપવનએવ સંગતાઃ પશ્ચિમક્રતુવિદા પુરોધસા ।
રોગશાન્તિમપદિશ્ય મન્ત્રિણઃ સંભૃતે શિખિનિ ગૂઢમાદધુઃ ॥ ૧૯-૫૪॥

તૈઃ કૃતપ્રકૃતિમુખ્યસંગ્રહૈરાશુ તસ્ય સહધર્મચારિણી ।
સાધુ દૃષ્ટશુભગર્ભલક્ષણા પ્રત્યપદ્યત નરાધિપશ્રિયમ્ ॥ ૧૯-૫૫॥

તસ્યાસ્તથાવિધનરેન્દ્રવિપત્તિશોકા-
દુષ્ણૈર્વિલોચનજલૈઃ પ્રથમાભિતપ્તઃ ।
નિર્વાપિતઃ કનકકુમ્ભમુખોજ્ઝિતેન
વંશાભિષેકવિધિના શિશિરેણ ગર્ભઃ ॥ ૧૯-૫૬॥

તં ભાવાર્થં પ્રસવસમયાકાઙ્ક્ષિણીનાં પ્રજાના-
મન્તર્ગૂઢં ક્ષિતિરિવ નભોબીજમુષ્ટિં દધાના ।
મૌલૈઃ સાર્ધં સ્થવિરસચિવૈર્હેમસિંહાસનસ્થા
રાજ્ઞી રાજ્યં વિધિવદશિષદ્ભર્તુરવ્યાહતાજ્ઞા ॥ ૧૯-૫૭॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસ-
કૃતાવગ્નિવર્ણશ‍ૃઙ્ગારો નામૈકોનવિંશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha 19 by Kalidas*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*